**महाभारते नारीणां स्थितिः**

भारतवर्षस्य आदिमहाकाव्यद्वयं हि रामायणं महाभारतं च। तत्र व्यासप्रणीतं महाभारतं नाम महाकाव्यम् सर्वेषां शास्त्राणाम् आकरभूतम् अर्थात् महाभारते भारतवर्षस्य सर्वे एव विषयाः प्रतिफलिताः दृश्यन्ते। महाभारतं हि भारतवर्षस्य समाजस्य, साहित्यस्य, दर्शनस्य तथा विषयान्तरस्य प्रतिविम्बस्वरूपम्। अत्र प्रतिफलितं समाजजीवनं वैशद्येन विचार्यते चेत् परिलक्ष्यते यत् महाभारतस्य सामाजिकजीवने नारीणाम् अत्युच्चम् अवस्थानम् आसीत्। महाभारतस्य अनुशासनपर्वणि नारीणां प्रशंसा दृश्यते। तथा च उक्तम् अनुशासनपर्वणि –

"स्त्रियो यत्र च पूज्यन्ते रमन्ते तत्र देवताः।

अपूजिताश्च यत्रैताः सर्वास्तत्रफलाः क्रियाः॥ "इति।

अत्र पूज्यन्ते इति पदस्य अर्थः बहुविधः। पूजा नाम समादरः, सत्कारः सम्माननं वा। महाभारतस्य नियमानुसारं यत्र स्त्रीणां पूजा क्रियते तत्रैव देवताः प्रसन्नतापूर्वकं निवसन्ति। किञ्च यत्र स्त्रीणां समादरो न क्रियते, तेषाम् अनादरः क्रियते, तत्र अनुष्ठिताः सर्वा अपि क्रियाः निष्फलाः भवन्ति। अतएव महाभारतस्य काले देवतानां स्थानं यथा अत्युच्चमासीत् नारीणामपि अवस्थानमपि तथैव अत्युच्चमासीत्। नार्यः देवताभिः सह तुल्यन्ते। धर्मशास्त्रकारेण आचार्येण मनुनापि निगदितम् – यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः इति।

यदि कस्मिन्नपि वंशे कन्याः दुःखनिमग्नाः सन्तः शोकमग्नाः भवन्ति तदा तस्य वंशस्य विनाशो ध्रुवायते। न केवलम् एतदेव, अपि तु, ता कन्याः दुःखनिमग्नाः गृहमुद्दिश्य यदि शापं यच्छन्ति, तत्र कृत्याद्वारा विनाशवत् सर्वं खलु विनष्टिमेति। तादृशस्य श्रीविहीनस्य गृहस्य कदापि सौन्दर्यवर्द्धनं न सम्भवति, तस्य वृद्धिरपि न कदापि साफल्यं प्राप्नोति। तदुक्तं महाभारते –

"तदा चैतत् कुलं नास्ति यदा शोचन्ति जामय।

जामीशप्तानि गेहानि निकृत्तानीव कृत्यया॥

नैव भान्ति न वर्धन्ते श्रिया हीनानि पार्थिव॥" इति।

महाभारतस्य अनुशासनपर्वणि वर्णितं यत् महाराजः मनुः यदा स्वर्गगमनं कृतवान्, तदा स स्त्रीजनान् पुरुषाणां हस्तेषु समर्पितवन्तः। तेन उक्तं यत्, हे मनुष्याः, रमण्यः भवन्ति अबलाः। तासाम् एतादृशं माहात्म्यं वर्तते यत्, ताः स्वल्पवस्त्रेणापि कार्यम् अतिवाहयितुं सक्षमाः भवन्ति। अकारणं विनैव रमण्याः हितं साधयितुं वाञ्छन्ति। सत्यपरायणाः भवन्ति रमण्यः, किञ्च सत्यलोकस्य विजयेऽपि तासामिच्छा ऐकान्तिकी दृश्यते। सम्माननस्य प्रार्थनां कुर्वन्ति वनिताः। यद्यपि क्वचित् क्वचित् कोपं प्रकटीकुर्वन्ति तथापि पुरुषान् प्रति मैत्रीं प्रदर्शयन्तीति नास्ति सन्देहः। ताः ऋजुस्वभावसम्पन्नाः भवन्ति। एतत् सर्वं

विचार्य वक्तुं शक्यते यत्, आचार्यस्य मनोः मतानुसारं रमण्यः सम्मानार्हाः। तस्मात् सर्वैरेव ताभ्यः सम्मानं प्रदातव्यम्। किं बहुना, धर्मशास्त्रकारस्य मनोः मतानुसारं रमण्य एव भवन्ति धर्मसिद्धिं प्रति मूलीभूतं कारणम्। अपि च रतिभोगः, परिचर्यात्मकं कर्म, नमस्कारादीकं च स्त्र्यधीनम् इति निश्चप्रचं वक्तुं शक्यते। तथा च भाति भारते –

"स्त्रियः पुंसां परिददे मनुर्जिगमिषुर्दिवम्।
अबलाः स्पल्पकौपीनाः सुहृदः सत्यजिष्णवः॥
ईर्षवो मानकामाश्च चण्डाश्च सुहृदोऽबुधाः।
स्त्रियस्तु मानमर्हन्ति ता मानयत मानवाः॥
स्त्रीप्रत्ययो हि वै धर्मो रतिभोगाश्च केवलाः।
परिचर्या नमस्कारास्तदायत्ता भवन्तु वः॥" इति।

महाभारतस्य अनुशासनपर्वणि स्त्रीणां प्रशंसाविषये पुनरपि उच्यते –

"उत्पादनमपत्यस्य जातस्य परिपालनम्।
प्रीत्यर्थं लोकयात्रायाः पश्यत स्त्रीनिबन्धनात्॥
सम्मान्यमानाश्चैता हि सर्वकार्याण्यवाप्स्यथ॥" इति।

अतएव जगतः रक्षणमपि तासां कृपया एव सम्भवति। मातरः यदि सन्तानस्य जन्मकर्मणि विमुखाः भवन्ति तर्हि अस्य जगतः प्रसारः न कदापि सम्भवति। न केवलम् एतदेव, अपि तु जातानां सन्तानादीनां पालनमपि मातर एव कुर्वन्ति। लोकयात्रायाः प्रसन्नतापूर्वकं निर्वाहकार्यमपि जनन्य एव सम्पादयन्ति। एतत् सर्वमपि स्त्र्यधीनम् वर्तते। अतएव जननीज्ञानेन ताभ्यः सम्मानं कर्तव्यम्। अन्यथा न कार्यसिद्धिः। अतएव अन्यत्रापि उच्यते, मातृदेवो भव इति, जननी जन्मभूमिश्च स्वर्गादपि गरियसी इति अलं विस्तरेण इति शम्।